## छन्दसो यदणौ। (७१/१४८०)

छन्दःशब्दाद् भवव्याख्यानयोरर्थयोः यदणौ प्रत्ययौ भवतः। द्वयचः इति ठकि प्राप्ते वचनम्। 'छन्दस्यः' (तै.सं. १.६.११.४) 'छान्दसः' (कौ. गृ. १४१.३.४)॥

## द्वयजृद्ब्राह्मणर्क्प्रथमाध्वरपुरश्चरणनामाख्याताट्ठक्। (७२/१४८१)

[1]द्वयजादिभ्यः [2]प्रातिपदिकेभ्यो व्याख्यातव्यनामभ्यो भवव्याख्यानयोरर्थयोः ठक् प्रत्ययो भवति। [3]अणादेरपवादः। द्वयचस्तावत् – ऐष्टिकः। [4]पाशुकः। ऋकारान्तात् – चातुर्होतृकः। पाञ्चहोतृकः। ब्राह्मण – ब्राह्मणिकः। ऋक् – आर्चिकः। प्रथम – प्राथमिकः। अध्वर – आध्वरिकः। पुरश्चरण – पौरश्चरणिकः। नामाख्यातग्रहणं सङ्घातविगृहीतार्थम् (म. भा. २.३१२)। नामिकः। आख्यातिकः। नामाख्यातिकः॥

## अणृगयनादिभ्यः। (७३/१४८२)

ऋगयनादिभ्यः प्रातिपदिकेभ्यो भवव्याख्यानयोरर्थयोः अण् प्रत्ययो भवति। ठञादेरपवादः। आर्गयनः। पादव्याख्यानः। अण्ग्रहणं बाधकबाधनार्थम्। वास्तुविद्यः।

ऋगयन। पदव्याख्यान। [5]छन्दोमान। छन्दोभाषा। [6]छन्दोविचिति। [7]न्याय। पुनरुक्त[8]। व्याकरण। [9]निगम। वास्तुविद्या। [10]अङ्गविद्या। क्षत्रविद्या। उत्पात। उत्पाद[11]। संवत्सर। मुहूर्त। निमित्त। उपनिषत्। [12]शिक्षा। ऋगयनादिः॥

## तत आगतः। (७४/१४८३)

ततः इति पञ्चमीसमर्थादागतः इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति। स्रुघ्नात् आगतः स्रौघ्नः। [13]माथुरः। [14]राष्ट्रियः। ततः इति मुख्यमपादानं विवक्षितं यत्तदिह[15] गृह्यते, न नान्तरीयकम्। स्रुघ्नादागच्छन् वृक्षमूलादागतः इति॥

## ठगायस्थानेभ्यः। (७५/१४८४)

आय इति स्वामिग्राह्यो भाग उच्यते, स यस्मिन्नुत्पद्यते तदायस्थानम्। आयस्थानवाचिभ्यः प्रातिपदिकेभ्यः ठक् प्रत्ययो भवति तत आगतः इत्येतस्मिन् [16]विषये। अणोऽपवादः। [17]छं तु परत्वाद् बाधते। शुल्कशालाया आगतः [18]शौल्कशालिकः। [19]आकरिकम्[20]। बहुवचनं स्वरूपविधिनिरासार्थम्॥

---

1. द्वयचजादिभ्यः नास्ति ब. 2. प्रातिपदिकेभ्यः नास्ति ब. 3. अणोऽपवादः ब. 4. पांशुकः क. 5. छन्दोनाम क. 6. छन्दोविजितीया क. इ, विद्या उद्याव भिक्षा इत्यधिकम् इ. 7. न्यायविद्या ड. 8. निरुक्त इत्यधिकम् फ. 9. निगदविद्या ह. 10. अण्डविद्या ड, नक्षत्रविद्या ह. 11. उद्याव इत्यधिकम् ब. क. 12. भिक्षा ब. 13. माधुरः ड. 14. नास्ति फ. 15. इह नास्ति ह. ड, परिगृह्यते ह. 16. अर्थे ह. 17. वृद्धात् इत्यधिकम् ड. 18. शौल्किकं फ. 19. आकरिकः ड, आकरात् आगतं इत्यधिकम् फ. ह. 20. नारिकम् आपणिकम् इत्यधिकम् ब, आपणिकः इत्यधिकम् क. ड. इ, प्रातरिकम् इत्यधिकम् इ.